# माँ बगलामुखी अष्टोत्तर-शतनाम-स्तोत्रम् in Hindi

ओम् ब्रह्मास्त्र-रुपिणी देवी,
माता श्रीबगलामुखी ।
चिच्छिक्तिर्ज्ञान-रुपा च,
ब्रह्मानन्द-प्रदायिनी ॥ **1** ॥

महा-विद्या महा-लक्ष्मी,
श्रीमत् -त्रिपुर-सुन्दरी ।
भुवनेशी जगन्माता,
पार्वती सर्व-मंगला ॥ **2** ॥

ललिता भैरवी शान्ता,
अन्नपूर्णा कुलेश्वरी ।
वाराही छिन्नमस्ता च,
तारा काली सरस्वती ॥ **3** ॥

जगत् -पूज्या महा-माया,
कामेशी भग-मालिनी ।
दक्ष-पुत्री शिवांकस्था,
शिवरुपा शिवप्रिया ॥ **4** ॥

सर्व-सम्पत्-करी देवी,
सर्व-लोक वशंकरी ।
वेद-विद्या महा-पूज्या,
भक्ताद्वेषी भयंकरी ॥ **5** ॥

स्तम्भ-रुपा स्तम्भिनी च,
दुष्ट-स्तम्भन-कारिणी ।
भक्त-प्रिया महा-भोगा,
श्रीविद्या ललिताम्बिका ॥ **6** ॥

मेना-पुत्री शिवानन्दा,
मातंगी भुवनेश्वरी ।

नारसिंही नरेन्द्रा च,
नृपाराध्या नरोत्तमा ॥ **7** ॥

नागिनी नाग-पुत्री च,
नगराज-सुता उमा ।
पीताम्बरा पीत-पुष्पा च,
पीत-वस्त्र-प्रिया शुभा ॥ **8** ॥

पीत-गन्ध-प्रिया रामा,
पीत-रत्नार्चिता शिवा ।
अर्द्ध-चन्द्र-धरी देवी,
गदा-मुद्-गर-धारिणी ॥ **9** ॥

सावित्री त्रि-पदा शुद्धा,
सद्यो राग-विवर्द्धिनी ।
विष्णु-रुपा जगन्मोहा,
ब्रह्म-रुपा हरि-प्रिया ॥ **10** ॥

रुद्र-रुपा रुद्र-शक्तिद्दिन्मयी,
भक्त-वत्सला ।
लोक-माता शिवा सन्ध्या,
शिव-पूजन-तत्परा ॥ **11** ॥

धनाध्यक्षा धनेशी च,
धर्मदा धनदा धना ।
चण्ड-दर्प-हरी देवी,
शुम्भासुर-निवर्हिणी ॥ **12** ॥

राज-राजेश्वरी देवी,
महिषासुर-मर्दिनी ।
मधु-कैटभ-हन्त्री च,
रक्त-बीज-विनाशिनी ॥ **13** ॥

धूम्राक्ष-दैत्य-हन्त्री च,

भण्डासुर-विनाशिनी ।
रेणु-पुत्री महा-माया,
भ्रामरी भ्रमराम्बिका ॥ **14** ॥

ज्वालामुखी भद्रकाली,
बगला शत्रु-नाशिनी ।
इन्द्राणी इन्द्र-पूज्या च,
गुह-माता गुणेश्वरी ॥ **15** ॥

वज्र-पाश-धरा देवी,
जिह्वा-मुद्-गर-धारिणी ।
भक्तानन्दकरी देवी,
बगला परमेश्वरी ॥ **16** ॥

फल- श्रुति
अष्टोत्तरशतं नाम्नां,
बगलायास्तु यः पठेत् ।
रिपु-बाधा-विनिर्मुक्तः,
लक्ष्मीस्थैर्यमवाप्नुयात्॥ **1** ॥

भूत-प्रेत-पिशाचाश्च,
ग्रह-पीड़ा-निवारणम् ।
राजानो वशमायाति,
सर्वैश्वर्यं च विन्दति ॥ **2** ॥

नाना-विद्यां च लभते,
राज्यं प्राप्नोति निश्चितम् ।
भुक्ति-मुक्तिमवाप्नोति,
साक्षात् शिव-समो भवेत् ॥ **3** ॥

## Maa Baglamukhi Ashtottara Shatnam Stotram in English

**Om Brahmastra-Rupini Devi,**
**Mata Shri Baglamukhi.**
**Chichchiktir Jnana-Rupa Cha,**
**Brahmananda-Pradayini || 1 ||**

**Maha-Vidya Maha-Lakshmi,**
**Shrimat-Tripura-Sundari.**
**Bhuvaneshi Jaganmata,**
**Parvati Sarva-Mangala || 2 ||**

**Lalita Bhairavi Shanta,**
**Annapurna Kuleshwari.**
**Varahi Chhinnamasta Cha,**
**Tara Kali Saraswati || 3 ||**

**Jagat-Pujya Maha-Maya,**
**Kameshi Bhaga-Malini.**
**Daksha-Putri Shivankastha,**
**Shivarupa Shivapriya || 4 ||**

**Sarva-Sampat-Kari Devi,**
**Sarva-Loka Vashankari.**
**Veda-Vidya Maha-Pujya,**
**Bhaktadveshi Bhayankari || 5 ||**

**Stambha-Rupa Stambhini Cha,**
**Dushta-Stambhana-Karini.**
**Bhakta-Priya Maha-Bhoga,**
**Shrividya Lalitambika || 6 ||**

**Mena-Putri Shivananda,**
**Matangi Bhuvaneshwari.**

**Narasinghi Narendra Cha,**
**Nriparadhya Narottama || 7 ||**

**Nagini Naga-Putri Cha,**
**Nagaraja-Suta Uma.**
**Pitambara Pita-Pushpa Cha,**
**Pita-Vastra-Priya Shubha || 8 ||**

**Pita-Gandha-Priya Rama,**
**Pita-Ratnarchita Shiva.**
**Ardha-Chandra-Dhari Devi,**
**Gada-Mudgara-Dharini || 9 ||**

**Savitri Tri-Pada Shuddha,**
**Sadyo Raga-Vivardhini.**
**Vishnu-Rupa Jaganmoha,**
**Brahma-Rupa Hari-Priya || 10 ||**

**Rudra-Rupa Rudra-Shaktiddinmayi,**
**Bhakta-Vatsala.**
**Loka-Mata Shiva Sandhya,**
**Shiva-Pujana-Tatpara || 11 ||**

**Dhanadhyaksha Dhaneshi Cha,**
**Dharmada Dhanada Dhana.**
**Chanda-Darpa-Hari Devi,**
**Shumbhasura-Nivarhini || 12 ||**

**Raja-Rajeshwari Devi,**
**Mahishasura-Mardini.**
**Madhu-Kaitabha-Hantri Cha,**
**Rakta-Beeja-Vinashini || 13 ||**

**Dhumraksha-Daitya-Hantri Cha,**
**Bhandasura-Vinashini.**
**Renu-Putri Maha-Maya,**
**Bhramari Bhramarambika || 14 ||**

**Jwalamukhi Bhadrakali,**
**Bagala Shatru-Nashini.**
**Indrani Indra-Pujya Cha,**
**Guha-Mata Guneswari || 15 ||**

**Vajra-Pasha-Dhara Devi,**
**Jihva-Mudgara-Dharini.**
**Bhaktanandakari Devi,**
**Bagala Parameshwari || 16 ||**

**Phala Shruti**
**Ashtottara-Shatam Namnam,**
**Bagalayastu Yah Pathet.**
**Ripu-Badha-Vinirmuktah,**
**Lakshmisthairyama Vapnuyat || 1 ||**

**Bhuta-Preta-Pishachashcha,**
**Graha-Pida-Nivaranam.**
**Rajanah Vashamayati,**
**Sarvaishwaryam Cha Vindati || 2 ||**

**Nana-Vidya Cha Labhate,**
**Rajyam Prapnoti Nishchitam.**
**Bhukti-Muktimavapnoti,**
**Sakshat Shiva-Samo Bhavet || 3 ||**